प्राज्याश्रिणिसाम्राज्ये सिलमसाहेः प्रशस्त भूपस्यः ।
श्रीगजसिंहमहीपे । लवेरनामनि शुभस्थाने ॥ १९ ॥
श्रीपातसहिपुंगवा सिलेस(म)साहो प्रवत्त(र्त्त)मानेऽत्र ।
राज्येनवकोट्टपतः । श्रीगजसिंहस्य भूपस्य ॥ २० ॥
चंद्रार्कौ गगने यावद्यावत्पृथ्वी सभूधरा ।
वाग्भटालंकृते वृत्ति । जीयाज्ज्ञानप्रमोदिका ॥ २१ ॥
वृद्धो मदीय शिष्ये । गणिगणगुणनंदनः ।
सनंदिजयः गुणनंदनगणिरालिखत्प्रथमादर्शप्रयत्नेन । ॥

References.-- This commentary on वाग्भटालंकार by ज्ञानप्रमोदगणि is mentioned neither by Aufrecht nor by Dr. S. K. De.

वृत्तिवार्त्तिक

Vṛttivārttika

No. 279

597.
1887-91.

Size.— 12¹ in. by 5⅛ in.

Extent.— 18 leaves ; 9 lines to a page ; 37 letters to a line.

Description.— Country paper, thick, brittle and musty ; slightly moth-eaten at the edges ; Devanāgarī characters ; borders ruled with double black lines ; the Ms is incomplete ; folio 1 missing.

Age.— Saṁvat 1732.

Author.— Appayyā Dīkṣita.

Begins.— folio 2—

"— कुलशोभैवसुक्तातिशायिनी संपदित्यभेदाध्यवसायार्थं अतिमुक्तशब्दस्यावयवार्थोपि विविक्षितस्तथापि तस्य वासंती गतत्वे etc.—"

Ends.—"— लक्षणा न स्यादिति वाच्यम् इष्टापत्तेः इति वृत्तिवार्त्तिके लक्षणावृत्तिनिर्णयो नाम द्वितीय परिच्छेदः ॥ २ ॥

समाप्तम् संपूर्णम् शुभमस्तु श्रीरस्तु

संवत् १७३२ वर्षे मसे आश्विन शुदि ११ रवौ दिने लिखितं....."

References.— 1 Mss Aufrecht i, 598ᵃ ; ii 112ᵇ, 226ᵇ ; iii, 115ᵇ. (two chapters).

2 S. K. De : Sanskrit Poetics, Vol. I, p. 267.

3 Printed Editions : (1) In the *Pandit* xii, 1890.

(2) Kāvyamālā, 36, 1893

वृत्तिवार्त्तिक

Vṛttivārttika

No. 280

534.
1884–1887.

Size.— $10\frac{3}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 16 leaves ; 12 lines to a page ; 46 letters to a line.

Description.— Country paper, very old musty and slightly worn out ; Devanāgarī characters; hand-writing bold and legible; borders ruled with double black lines.

Age.— The Ms appears to be old.

Author.— Appayya Dikṣita.

Begins.—

श्रीगणेशाय नमः ॥

विश्वं प्रकाशयंती व्यापारैलक्षणाभिधाध्वननैः ॥ etc.

Ends.—

"क्वचिदपि सारोपलक्षणानस्यादिति वाच्यम् ॥ इष्टापत्तेः ॥ इतिवृत्तिवार्त्तिके लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः समाप्तिमगमत् ॥ श्रीरस्तु ॥

After this colophon about 8 lines from some other work appear as under:—

" इश्वरस्य कार्यमात्रं प्रतिकारणता ।.....अंत्ये ईश्वरस्य सर्वज्ञत्वं न स्यात् ॥ उभयतः पाशारज्जुः ॥ श्रीरस्तु । शुभंभवतु कल्याणमस्तु ॥

References.-- Same as in No. 279.

वृत्तिवार्त्तिक

Vṛttivārttika

No. 281

596.
1887–91.

Size.— 11 in. by $4\frac{1}{2}$ in.

Extent.— 24 leaves ; 11 lines to a page ; 40 letters to a line.

Description.— Country paper, old and grey in appearance; Devanāgarī characters; hand-writing clear and legible but not uniform; borders ruled with double black lines; the Ms is not written carefully.

Age.— The Ms appears to be old.

Author.— Appaya Dīkṣita.

Begins—

" श्रीमहागणपतये नमः ॥
विश्वं प्रकाशयंती व्यापारैर्लक्षणाभिधाध्वननैः ।
न्यनैरिव हरमूर्तिर्विबुधो पास्या सरस्वती जयति etc.
.....क्रियते वृत्तिवार्तिकम् ॥ ३ ॥

Ends.—

" न चैवं सर्वत्र विषयविषयिपदसामानाधिकरण्यस्थले समभिव्याहारादभेदप्रतीतेर्वक्तुं शक्यत्वात्क्वचिदपि सारोपलक्षण न स्यादिति वाच्यं इष्टापत्तेः ॥ इति अप्पाजीदीक्षितविरचिते वृत्तिवार्त्तिके लक्षणवृत्तिनिर्णयोनाम द्वितीयः परिछेदः ॥ समाप्तिगमत् ॥ ॥ ॥ एतावदेव ग्रंथः कृतो नु तु समाप्तिगतः ॥

References.— Same as in No. 279.

वृत्तिवार्त्तिक

Vṛttivārttika

No. 282

709
1891–95.

Size.— $8\frac{5}{8}$ in. by $4\frac{1}{4}$ in.

Extent.— 16 leaves; 11 lines to a page; 36 letters to a line.

Description.— Country paper, very old and worn out; Devanāgarī characters; hand-writing small, clear and legible; folios 8 and 11 missing.

The Ms is incomplete.

Age.— Samvat 1799.

Author.— Appayya Dīkṣīta.

Begins—

श्रीगणेशाय नमः ॥

विश्व प्रकाशयंती व्यापारैर्लक्षणाभिधाध्वननैः

etc.....क्रियते वृत्तिवार्त्तिकं ॥ १ ॥

Ends—

"...क्वचिदपि सारोपलक्षणा न स्यादितिवाच्यं । इष्टत्वादितिसंक्षेपः ।
संवत् १७९९ श्रा. कृ. १० गौरीदत्तेन लिखिता....."

References.— Same as in No. 279.

वृत्तिवार्त्तिक — Vṛttivārttika

No. 283 — 262. / 1875-76.

Size.—$8\frac{1}{8}$ in. by $4\frac{1}{4}$ in.

Extent.— 36 leaves; 8 lines to a page; 22 letters to a line.

Description.— Modearn paper with water lines; bluish in colour; Devanāgarī characters; hand-writing, clear bold and legible; borders ruled with double red lines.

This Ms contains two परिच्छेदs.

Age.— The Ms is a new copy-Samvat 1932.

Author.— Appayya Dīkṣita.

Begins—

॥ श्रीगणेशाय नमः ॥

विश्वं प्रकाशयंती व्यापारैर्लक्षणाभिधाध्वननैः
नयनैरिव हरमूर्तिर्विबुधोपास्या सरस्वती जयती ॥ १ ॥
वृत्तयः काव्यसरणावलंकारप्रबधृतिः
अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥ २ ॥

तत्र क्वचित्क्वचिद्वृद्धैर्विशेषानस्फुटीकृतान्
निष्टंकयितुमस्माभिः क्रियते वृत्तिवार्तिकं ॥ २ ॥

Ends.—

" न चैवं सर्वत्र विषयिपदसामानाधिकरण्यस्थले समभिव्याहाराभेदप्रतीतेर्वक्तुं शक्यत्वात्क्वचिदपि सारोपलक्षणा न स्यादिति वाच्यं इष्टापत्तेः इति वृत्तिवार्तिकेषा(?) दीक्षितकृते लक्षणावृत्तिर्निणयो नाम द्वितीयः परिछेदः समाप्तः ॥ २ ॥ ग्रंथसंख्या ४५५ ॥ सं. १९३२ ॥

References.— Same as in No. 279.

वृत्तिवार्त्तिक

Vṛttivārttika

No. 284

216.
1882–1883.

Size.— $10\frac{1}{8}$ in. by $4\frac{1}{3}$ in.

Extent.— 13 leaves ; 12 lines to a page ; 47 letters to a line.

Description.—Country paper, old, thin and moth-eaten at the edges; Devanāgarī characters ; hand-writing clear and legible but not uniform.

Age.— The Ms appears to be old.

Author.— Appayya Dīkṣita.

Begins.—

श्रीगणेशाय नमः ॥
विश्वं प्रकाशयंती व्यापारैर्लक्षणाभिधाध्वननेः
नयनैरिवहरवमूर्तिर्विदुषोपास्या सरस्वती जयति ॥ १ ॥ etc.

Ends.—

" क्वाचिदपि सारोपलक्षणा न स्यादितिवाच्यम् ॥ ॥ इति श्रीलक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः ॥ अथ दीक्षितकृते वृत्तिवार्त्तिके समाप्तः । ॥ श्रीरस्तु ॥ कल्याणमस्तु शुभमस्तु ॥

References.— Same as in No. 279.

वृत्तिवार्त्तिक — Vṛttivārttika

No. 285 — 261. 1875-76.

Size.— $8\frac{1}{4}$ in. by $4\frac{3}{8}$ in.

Extent.— 33 leaves ; 8 lines to a page ; 28 letters to a line.

Description.— Modern paper with water lines, bluish in colour Devanāgarī characters ; borders ruled with double red lines; hand-writing bold, uniform and legible.

The Ms is a modern copy.

Age.— The Ms is a copy made in 1875.

Author.— Appayya Dīkṣita.

Begins.—

श्रीगणेशाय नमः ॥

विश्वं प्रकाशयंती etc.....क्रियते वृत्तिवार्तिकं ॥ ३ ॥

Ends.—

" — न स्यादितिवाच्यं इष्टापत्तेः इति वृत्तिवार्तिके अप्पयादीक्षित-कृतौ लक्षणायां वृत्तिनिरुपणं नाम द्वितीयः परिच्छेदः समाप्तः ॥ २

References.— Same as in No. 279.

लक्षणनिरूपण — Lakṣaṇanirūpaṇa

No. 286 — 708. 1891-95.

Size.— 9^3 in. by $4\frac{3}{8}$ in.

Extent.— 2 leaves ; 18 lines to a page ; 54 letters to a line.

Discription.— Country paper, very old and thin ; Devanāgarī characters ; hand-writing small but legible and uniformly careful ; borders ruled with double black lines.

Age.— The Ms appears to be old.

Author.— Not mentioned.

Begins.—

॥ ६० ॥ अथ मुख्य लाक्षणिकव्यंजकानां शब्दानां स्वरूपमाह ॥
शब्दो मुख्यो लाक्षणिको व्यंजकश्च त्रिधामतः ।
मुख्यार्थवाचको मुख्यो व्यापारोर्थस्याभिधा ॥ १ ॥
लक्ष्या श्रितो लाक्षणिको व्यापारो लक्षणस्य तु ।
व्यंग्ययुक्तो व्यंजकोस्य व्यापारो व्यंजन मतं ॥ २ ॥
साक्षात्संकेतविषयो गोपिं मादि वाच्यो मुख्योर्थः
तदभिधायोगो प्रभृति शब्दोपि मुख्यः अस्य मुख्यशब्दस्य मुख्यार्थे व्यापारः
etc.

Ends.—

"एवं प्रकाराः शब्दा लक्षणा साधकाः यथौचित्यं प्रयोज्याः ।

यथा—

विप्रोप्ययं श्रुतमहीनमहनिकीर्ति ।
लुंटाक शक्तिरपसादयुरुप्रसादः ॥
वेध्यं प्रतापयति पश्यत रे नरेंद्राः ।
कात स्मरन् मनासे गौरुचं न कृष्णां ॥ १ ॥
इति लक्षणनिरूपणं समाप्तं ॥ श्रीरस्तु ॥

श्रीवराहनगरे लिखितं धर्मविशालेन आनेत्र मात्त प्रमोदकृते ॥

References.— Aufrecht mentions this Ms only iii, 114[a], A K 708.

लघुकुवलयानंद Laghukuvalayānanda

No. 287 — 477. / 1895-1092.

Size. — 9 in. by $4\frac{3}{4}$ in.

Extent.— 16 leaves; 14 lines to a page; 33 letters to a line.

Description.— Modern paper with water lines; Devanāgarī characters; hand-writing small but uniformly clear and legible; borders ruled with double red lines.

Age.— The Ms is a modern copy.

Author— Vaidyanātha Pāyaguṇḍa.

Begins.—

श्रीगणेशाय नमः ।

प्रणिपत्य गणाध्यक्षं प्रत्यूह व्यूहनाशकं ।
लघुः कुवलयानंदो वैद्यनाथेन रच्यते ॥ १ ॥
उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसवि कृष्ण ते कीर्तिः स्वर्गंगामवगाहते ॥ १ ॥

Ends. —

" निंदास्तुतिस्तथैवोक्ता निंदारूपेण या स्तुतिः
वस्तुवस्तूपमानेन दर्शनं तन्निदर्शनम् ॥

किं वा तथा स्यादुपमा तु यत्र तेनैव तस्यैव भवेन्नृवीर तमन्वयाख्यं कथितं पुराणैरेतावदुक्तं तव लेशमात्रमिति ॥

पायगुंडकुलांभोधौ वैद्यनाथः कलानिधिः ।
उदितस्तेन बालानां सुखायाल्पाक्षरः कृतः ।
लघुः कुवलयानंदस्तेन तुष्यतु शंकरः ॥

इति श्रीपायगुंडो(डे) त्युपनामकवैद्यनाथेनविरचिता(तः) लघुकुवलयानंदः समाप्तः

References.— Aufrecht does not mention this work in his Calalogus Catalogorum.

शब्दव्यापार-विचार	Sabdavyāpāra-vicāra
No. 288	263. / 1875-76.

Size.— 14 in. by 6 in.

Extent.— 6 leaves ; 12 lines to a page ; 44 letters to a line.

Description.— Country paper, not very old, smooth and grey in appearance ; Devanāgarī characters ; hand-writing bold,

clear, uniform and legible ; yellow pigment used for corrections ; certain lines and words marked out with red pigment.

Age.— The Ms appears to be a new copy.

Author.— Mammaṭa.

Begins.—

ॐ श्रीगणेशाय नमः गुरवे नमः ॥

इह हेयो पादेयानां हानोपादानं प्रमाणादेव । तच्च निश्चयात्मतया प्रामाण्यं भजते । निश्चयश्च शब्दसाहित्येनार्थं विषयी करोति । शब्दस्य चार्थप्रतीतिं प्रतिपत्तिन्यायान्यथा नुपपत्या कारकत्वात्कल्प्यमानो व्यापारोभिधादिशब्दप्रतिपाद्यो नानाप्रकार इति तत्परीक्षाथ शब्दव्यापारविचारात्मकं प्रकरणमिदमारभ्यते ।

Ends.—

एतच्चान्यत्र विस्तरेण विचारितमिति संक्षेपेणेहोक्तमिति शिवम् ॥ इति निखिलविपश्चिच्चक्रवर्तिश्रीराजानकमम्मटाचार्यविरचितः शब्दव्यापारविचारः समाप्तः ॥

References.— 1 Mss : Aufrecht i, 634[a].
2 S. K. De : Sanskrit Poetics, Vol. I, p. 260.
3 Edition : by M. R. Telang Nir. S. P. 1916.

शृङ्गारातिलक

Śṛṅgāratilaka

No. 289

217.
1882–83.

Size.— 10½ in. by 4⅝ in.

Extent.— 28 leaves ; 9 lines to a page ; 33 letters to a line.

Description. – Country paper, very old, musty and worn out ; Devanāgarī characters ; hand-writing medium size, clear, and legible ; borders ruled with two double black lines ; colophons and verse numbers marked out with red pigment; folios 1 and 4 missing.

Age.— Samvat 1654.

Author.-- Rudra.

Begins.— fol. 2

" अथ व्यतिरेकसुखेन रसप्रशंसा ॥

यामिनी चंदुना मुक्ता नारी च रमणं विना ।
लक्ष्मीरिव ... ...नीरसा ॥ ६ ॥

॥ स्वपांडित्यप्रशंसा ॥

Ends.—

अन्येष्वपि रसेष्वेत दोषा वर्ज्या मनीषिभिः ।
यत्संपर्कान्नयत्येव काव्य रसपरंपरा ॥ ८० ॥
इति मया कथितेन यथामुना रसविशेषमविशेषमुपेयुषी ।
लालतपादपदासदलंकृतिः ।
कृतधियामिह वाग्वनितायते ॥ ८१ ॥
शृंगारतिलको नाम ग्रंथोयं रचितो मया ।
व्युत्पत्तये नपेक्षंते कवयः कामिनः स्वयं ॥ ८२ ॥
काम्या काव्यकथा कीदृक् वैदग्ध्ये को रसागमः ।
किं गोष्टीमंडनं हंत शृंगारतिलकादृते ॥ ८३ ॥
त्रिपुरवधादेवगतासुल्लासमुमां समस्तविबुधनुतं ।
शृंगारतिलकविधिना पुनरपि रुद्रः प्रकटयति ॥ ८४ ॥

इति श्रीशंगारातलक श्रीरुद्रविरचिते काव्यालंकारे तृतीयः परिच्छेदः समाप्तः ॥

॥ सहानुभावव्यभिचारिभिः समं
समत्य तद्वत्सहसात्विकैश्च
आलंबते सर्व रसानताय·
मालंबनस्तेन भवेद्विभावः
न चोनुभावव्याभिचारियोगं
नापेक्षते सात्विकभावयोगं ।
उद्दीपयेत् केवलमेव यस्मा·
दुद्दीपनस्तेन भवेद्विभावः ॥

संवत् १६५४ समये भाद्र शुदि १० शुक्रे लिखितं

References.— 1 Mss : Aufrecht i, 660[b] ; ii 158[a], 230[b] ; iii, 137[a].

2 S. K. De : Sanskrit Poetics, Vol. I, p. 90.

The Mss in the Mad. Govt. Library (Mad. Cat. No. 12955) and in I. O. Litrary (I. O. Des. Cat. Nos. 1131-2) call the author Rudrata. Our Ms. 264 of 1875-76 also assigns the authorship to *Rudrata*.

3 Edition : The work has been printed in the Kāvyamāla series, pt. III, 1887.

शृङ्गारतिलक Śṛṅgāratilaka

No 290 808. 1886-92.

Size.— 11⅕ in. by 6 in.

Extent.— 24 leaves; 8 to 12 lines to a page; 33 letters to a line.

Description.— Country paper, very old, brittle and worn out; Devanāgarī characters; borders ruled with triple black lines; hand-writing bold, clear and legible; the Ms appears to have been written by different hands; incomplete and fragmentary: at the end of the Ms there are a few broken fragments of folios; some of the verse-numbers and colophons of chapters are marked out with red pigment; folios 14-16 missing.

Age.— The Ms is very old.

Author.— Rudra.

Begins.—

॥ श्रीगणेशाय नमः ॥ गौरीशंकराभ्यां नमः ॥

॥ शृंगारो गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे
वीभत्सोस्थिभिरुत्फणी च भयकृन्नेत्रत्रयेणाद्भुतः
रौद्रोदक्ष...मर्दनेन हसकृन्नग्नः प्रशांतः समा-
दित्थं सर्वरसात्मकः पशुपतिर्भूयात्सतां भूतये ॥ १ ॥

आख्यातनामरचना चतुरस्रसंधि ।
सद्वागलंकृतिगुणं सरसं सुवृत्तं ॥

आसेदुषामपि दिवं कविपुंगवानां ।
तिष्ठत्यखंडमिह काव्यमयं शरीरं ॥ २ ॥
... ...
प्रा...नायं प्रति प्रोक्तं भरतार्थैरसस्थितिः ।
यथामति मयाप्येषा काव्यं प्रति निगद्यते ॥ ५ ॥
यामिनीवेन्दुनामुक्ता etc.

Ends.---

इति श्रीरुद्रभट्टविरचिते शृंगारतिलके संकीर्णवण(र्ण)नो नाम तृतीयः.....समाप्तोयं शृंगाररसः

References.— Same as in No. 289.

शृङ्गाररसमण्डन — Śṛṅgārarasamaṇḍana

No. 291 — 202. 1879–1880.

Size.— $9\frac{1}{4}$ in. by $5\frac{1}{2}$ in.

Extent.— 16 leaves ; 25 lines to a page ; 12 letters to a line.

Description.— Country paper, very old, thin and worn out ; Devanāgarī characters ; hand-writing bold and legible ; borders ruled with two double black lines ; the Ms seems to be a part of some other Ms since the work begins on fol. 409^{b} and ends on fol. 424^{a}.

Age.— The Ms appears to be old.

Author.— Viṭṭhaleśvara.

Begins.--

॥ श्रीगोपीजनवल्लभाय नमः ॥
॥ श्रीवल्लभात्मजो जयति श्रीगोविंदसुतुर्जयति ॥
मुदा चंद्रावल्या कुसुमशयनीयादि रचितुं ॥
महा संसंप्रोक्ताः स्वप्रणयि सहचर्यत्प्रमुदिता ॥
निकुंजेष्वन्योन्यं कृतविविधतल्पोषु सरसां ॥
कथां स्वस्वामिन्याः सपदि कथयति प्रियतमां ॥ १ ॥

अशेषसुकृतोदयैरखिलमंगलैर्वेयसा ।
मनोरथशतैः सदा मनसि भावितैः निर्मिते
अहात्याति मनोहरे निजगृहाद्विहारेछया ।
सखी शतवृता चलद्व्रजवनेषु चंद्रावली ॥ २ ॥

Ends.—

राधा चंद्रावली गोपी दासी कथितमद्भुत
संपूर्णमभवत्कुंजे शृंगाररसमंडणं ॥ २०७ ॥
इात श्रीमद्राजे शस्य तप्रियाणां च वांछित
मिथः सर्वस्वदानं च श्रीविट्ठलस्वाशये करोत् ॥
इति श्रीगोपीजनवल्लुभैकतान श्रीविट्ठलेश्वरविरचितं शृंगाररसमंडनं
संपूण ॥ शुभं भवतु ॥ छ ॥

References.— 1 Aufrecht's Catalogus Catalogorum Part I, 661[a]; Part II 158[a], 230[b]; Part III, 137[b].
2 S. K. De : History of Sanskrit Poetics Vol. I, page 311.

शृङ्गाररसमण्डन — Śṛṅgārarasamaṇḍana

No. 292 — 357. / 1884-89.

Size.—10 in. by 4¼ in.

Extent.— 14 leaves; 7 lines to a page; 29 letters to a line.

Description.— Country paper, thin and slightly whitish in appearance; Devanāgarī characters; hand-writing bold, clear and legible; some of the folios are slightly moth-eaten; folios 1-11 missing.

Age.— Saṁvat 1889.

Author.-- Viṭṭhaleśvara.

Begins.— folio. 12

—" त्वं समागतः ॥ ८५ ॥
तावद्विलंबमसहिष्णुरमंदमं च
त्कांचीकलापकलासिंजितभंजुगत्या ।
गोवर्द्धनाद्रिशिरसश्चपलोत्तरीय-
श्चंद्रावलीनिकटमागमदंबुजाक्षः ॥ ८६ ॥ etc.

Ends.—

राधा चंद्रावली गोपी दासी कथितमद्भुतं ।
संपूर्णमभवत्कुंजे शृंगाररसमंडनं ॥ ९ ॥
इति श्रीमद्व्रजेशस्य तत्प्रियाणां च वांच्छितं ।
मिथसर्वस्वदानं श्रीविट्ठलस्वाशये करोत् ॥ १० ॥

इति श्रीगोपीजनवल्लभैकतानश्रीविट्ठलेश्वरविरचितं शृंगाररसमंडनं संपूर्ण ॥

संवत् १८८५ वर्षे आसाढविद ११ रवौ शुभं भूयात्

References.— Same as in No. 291.

शृङ्गाररसमण्डन — Śṛṅgārarasamaṇḍana

No. 293 — 392. / 1892-95.

Size.— $7\frac{1}{4}$ in. by $4\frac{3}{4}$ in.

Extent.— 21 leaves; 11 lines to a page; 20 letters to a line.

Description.— Country paper, old brittle and slightly moth-eatan; Devanāgarī characters; hand-writing, bold and legible; borders ruled with double black lines; verse-numbers marked out with red pigment.

Age.— The Ms appears to be old.

Author.— Viṭṭhaleśvara.

Begins.—

श्रीगोपीजनवल्लभाय नमः ॥
मुदा चंद्रावल्या कुसुमशयनीयादि रचितुं ।
सहायं प्रोक्ताः स्वप्रणयिसहचर्यः प्रमुदिताः ॥
निकुंजेष्वन्योन्यं कृतविविधतल्पेषु सरसां ।
कथां स्वस्वामिन्याः सपदि कथयंति प्रियतमां ॥ १ ॥ etc.

Ends.—

राधा चंद्रावली गोपी दासी कथितमद्भुतं ।
संपूर्णमभवत्कुंजे शृंगाररसमंडनं ॥ ४ ॥

इति श्रीगोपीजनवल्लभैकतान श्रीविट्ठलविरचिते शृंगाररसमंडनं संपूर्ण ॥
भट श्रीमंगलेन लिखितं

References.— Same as in No. 291.

शृङ्गाररसमण्डन — Śṛṅgārarasamaṇḍana

No. 294 — 474. 1887–91.

Size.— $7\frac{1}{2}$ in. by $4\frac{5}{8}$ in.

Extent.— 13 leaves; 16 lines to a page; 31 letters to a line.

Description.— Country paper, very old, musty and worn out; Devanāgarī charactets; hand-writing small but clear and legible, though not uniform; borders ruled on four sides with double black lines; folio 13 missing.

Age.— The Ms appears to be very old.

Author.— Viṭṭhaleśvara or Viṭṭhla Dīkṣita.

Begins.—

॥ श्रीकृष्णाय नमः ॥
कथय कथय स्वामिन्या मे कथं नव संगमः ।
सुमुखि रामभूद्गोविंदस्यांदिराधिकराधया ॥
सखि विदितमे चैतत्ते किं ब्रुवे यदियं कथा ।
व्रजवरवधू दासीनां नः कृशोदरिजीवितं ॥ १ ॥

Ends.—

इदमेव मे सदा सख्या शाम्यं नंदनं नो राधां ।
सुखयत्वत्वनिशंसास्मास्वनुग्रहं च प्रिया कुर्यात् ॥ २६ ॥
इति श्रीमद्गोपीजनचरणपंकेरुह युगा-
नुगामिस्तत्प्रेमामृतजलधिमग्नाभिरनिषं ॥

बभूवेदं पूर्णं स्मितजितसुधाभिर्विरचितं ।
निकुंजे शृंगाराभिधरसवरे मंडनवरं ॥ २७ ॥
यस्मात्सहायभूतो दामोदरदास हरीवंशो ॥
श्रीविट्ठलरचितमिदं तदभूच्छृंगारमंडनं पूर्णं ॥ २८ ॥
श्रीकृष्णदेवप्रियरामदासादिषु प्रकुर्वत्सु मुकुंदसेवां ।
गोवर्द्ध(द्ध)नेशस्य सदा मदीय सर्वस्वरूपस्य कृतं मयेदं ॥ २८ ॥

इति श्रीगोपीजनवल्लभचरणैकतानश्रीविट्ठलदीक्षितविरचिते शृंगार-रसमंडने दशम उल्लासः ॥ छ ॥ ॥

॥ श्रीविट्ठलेशशरणं मम ॥ श्रीगोवर्द्धनधारीश(र)णं मम ॥ छ॥

References.— Same as in No. 291.

शृङ्गारहार

Śṛṅgārahāra

No. 295

304.
1880-81.

Size.— 9½ in. by 5 in.

Extent.— 5 leaves; 14 lines to a page; 34 letters to a line.

Description.— Country paper, old and brittle; Devanāgarī characters; hand-writing bold, clear and legible; certain portions of the text marked out with red pigment; the work is divided into 3 vibhāgas, called (1) संभोगशृंगार; (2) and (3) have no titles mentioned in the colophons.

Age.— Samvat 1845.

Author.— Baladeva.

Begins. —

विघ्नेशं विघ्नहंतारं सर्वकामफलप्रदं ।
करुणाकोमलकांतं वंदे देवं गजाननं ॥ १ ॥
पौत्रः श्रीवसुदेवस्य केशवस्यांगसंभवः ।
ग्रंथं शृंगारहाराख्यं बलदेवः करोम्यहं ॥

शृंगारस्य हास्यकरुणरौद्रवीरभयानकः ।
बीभत्साद्भुतशांताश्च नवकाख्ये रसास्मृताः ।
इति नवरसाः etc.

Ends.—

प्रधानपुरुषप्राया शतवक्रोक्तिसंयुता ।
भारतीय भवेद्वृत्तिर्वीरहास्याद्भुताश्रया ॥

इति श्रीबलदेवविरचिते काव्यालंकारे शृंगारहारे तृतीयो विभागः ॥
संवत् १८४५ वर्षे आसीड शुदि ९ खेमे गोवर्द्धनसुतभवानीसंकरपठनार्थः श्रीकृष्णाय नमः ॥

References.— (1) Aufrecht mentions this Ms. only i, 661[b].
(2) S. K. De also refers to tnis Ms. only in his Sanskrit Poetics, Vol. I. p. 303.

सरस्वतीकण्ठाभरण Sarasvatīkaṇṭhābharaṇa

No. 296 116. 1919-24.

Size.— 11⅓ in. by 4 in.

Extent.— 131 leaves ; 11 lines to a page ; 49 letters to a line.

Description.— Country paper, old, musty and slightly moth-eaten; Devanāgarī characters ; hand-writing small but clear, uniform and legible ; borders ruled with double black lines ; the Ms is incomplete ; folios 1 to 25 wanting ; folios missing are :— 109, 110, 134 & 142 ; colophon of II paricceda appears on folio 55, of III on folio 75 and of IV on folio 108.

Age.— Samvat 1821.

Author.— Bhojadeva.

Begnis.-- folio 26

" प्रसूतराजाप्रजापतिसमो जनकः पिता ते
तेषां वधूस्त्वमसि नंदिनि पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च " ॥ ४४ ॥ etc.

Ends.—

" इतिश्रीमहाराजाधिराजश्रीभोजदेव सरस्वतीकंठाभरणालंकारे...
... ... छेदः ॥ शुभमस्तु ॥ शीधीरस्तु जयकृष्णलक्ष्मणाभ्यां
सहोदराभ्यां परापकाराय समाप्त ... . एथ न एकट समाप्त
कली माघवदकृिष्णपक्षे पंचमा संवत १८२१ ॥ ॥ काशीमध्ये वींदमाधव
शमीपे गंगातटे कालभैरवशनीपे ब्रह्मघाटे जोदे प्या शोली पाममहोशनदीयते
जामा एकइ...मपावलानवा पातला ॥ छ ॥ छ ॥ ॥

References.— (i) Mss. : See Aufrecht i, 699[a] ; ii, 167[a] ; iii, 145[a]
(ii) S. K. De : Sanskrit Poetics Vol. I, pp. 144, 148.

सरस्वतीकण्ठाभरण Sarasvatikaṇṭhābharaṇa

No. 297 207. / 1879-80.

Size.-- 9 in. by 4 in.

Extent.— 77 leaves ; 14 lines to a page ; 51 letters to a line.

Description.— Country paper, very old, fibrous and worn out ; Devanāgarī characters ; hand-writing small but clear and legible ; some of the folios have pink-coloured borders, while some have yellow-coloured borders ; the Ms contains the following paricchedas :—

Paricchedas	I	folios	1	to	22
Do	II	,,	1	to	35

Age.— The Ms appears to be very old.

Author.— Bhojadeva.

Begins.—

श्रीगणेशाय नमः ॥

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयं ।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥ १ ॥ etc.

Ends.--

— शब्दसंदर्भमात्रेण हृदयं हर्तुमीशते ॥

इति महाराजाधिराजश्रीमद्भोजविरचिते सरस्वतीकंठाभरणे शब्दालंकार-निर्णयो नाम द्वितीयः परिछेदः ॥ शुभं भवतु लेखकपाठकयोः ॥ ॥ श्रीः ॥

References.— Same as in No. 296.

सरस्वतीकण्ठाभरण — Sarasvatikanthabharana

No. 298 — 363. 1884-86.

Size.— $8\frac{1}{4}$ in. by $4\frac{3}{8}$ in.

Extent.— 149 leaves ; 7 lines to a page ; 32 letters to a line.

Description.— Modern paper, somewhat brownish in appearance ; Devanāgarī characters ; hand-writing bold, legible and uniform ; on the first 9 folios certain lines are marked out with red pigment ; incomplete.

Age.— Not very old.

Author.— Bhojadeva.

Begins.--

ॐ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥
ॐ । ध्वनिर्वर्णः पदं वाक्यमित्यास्पदचतुष्टयं ॥
यस्यां सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ।
निर्दोषं गुणवत्काव्यमलंकारैरलंकृतं ।
रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विंदति ॥ २ ॥

Ends.— folio 149

" क्रोधः क्रुध्यतीति रुद्रशक्तिश्चक्रुत् ॥ चेतना चिनोतीति चयं न चचित ॥ ज्ञानं सत्ता वि—"

References.— Same as in No. 296.

सरस्वतीकण्ठाभरण Sarasvatīkaṇṭābharaṇa

No. 299 67. / 1880-81.

Size.— 10¼ in. by 2 in.

Extent.— The folios cannot be counted as the Ms is difficult to handle, being in a fragmentary condition.

Description.— Palm-leaves, written on with ink; Devanāgarī characters; hand-writing clear, bold and legible; there are good many blank folios at one end of the Ms; almost all the folios are broken up and difficult to handle being extremely brittle; the written contents are in two columns on each folio; borders of each column are ruled with double black lines; a hole is bored in the marginal blank between the two columns; पृष्ठमात्राs used.

Age.— The Ms appears to be very old.

Author.— Bhojadeva.

Begins.— folio 3 (fragmentary)

" — हरिशब्देन सह शांशुसोपिनतेन नाम्ना बहुभिर ..... नाम ...etc.

Ends. — folio 353 (fragmentary)

"विशेष प्रतिपत्तिनिमित्तम्नवति । तयथा गौरित्यर्थशब्दोमुख्यया वृत्या—"

References.— Same as in No. 296.

सरस्वती-कण्ठाभरणटीका (रत्नदर्पण) Sarasvatī-kaṇṭhābharaṇaṭīkā (Ratnadarapaṇa)

No. 300 364. / 1884-86.

Size.— 14 in. by 5½ in.

Extent.— 32 leaves; 11 lines to a page; 48 letters to a line.

Description.— Country paper, thick and whitish in appearance; Devanāgarī characters; hand-writing very bold, thick and legible; incomplete.

Age.— The Ms is not very old.

Author.— Miśra Ratneśvara.

Begins.—

श्रीगणेशाय नमः ॥

एकेन यस्य यमिनः प्रमदेव देह-
मर्द्धेन राजति पुमानिव चापरेण ।
तत्वक्रमादथ च न ग्रमदापुमान्वा
प्रेयांसि वर्द्धयतु सस्मर शासनो वः ॥ १ ॥

श्रीरामसिंहदेवेन दोर्दंडदलितद्विषा ।
क्रियतेऽवंतिभूपालकंठाभरणदर्पणः ॥ २ ॥

कंठाभरणमनद्यं वाग्देवीरत्नदर्पणोत्संगे ।
अस्मिन्पश्यतु निभृतं प्रकाशसर्वांगलावण्यं ॥ ३ ॥

ग्रंथारंभे समुचितेष्टदेवतानमस्कारेण etc.

Ends.— on the last folio 32

" शब्द एव ध्वन्यते स शब्दध्वनिरभिमत इति केचित्तन्न शब्दस्यैव ध्वन्यतां नंग्गेका एत् नाभ्यां पुंडरीकधारणमित्यादि व्याख्याग्रंथभंगप्रसंगाच्च तस्माच्छब्दाश्रितं....."

References.— 1 Mss: Aufrecht i, 699[b]; ii, 167[a]; iii, 145[a].
2 S. K. De: Sanskrit Poetics, Vol. I, 149–50.

सहृदयलीला Sahṛdayalilā

No. 301 266. 1875–76.

Size.— 13¾ in. by 6 in.

Extent.— 3 leaves; 12 lines to a page; 37 letters to a line.

Description.— Country paper, not very old; slightly grey in appearance ; Devanāgarī characters ; corrections made with yellow pigment ; hand-writing bold, clear and legible.

Age.— The Ms appears to be a new copy.

Author.— Ruyyaka.

Begins.—

ॐ अथ सहृदयलीला लिख्यते ॥ श्रीमतामुत्कर्षपरिज्ञानाद्वैदग्ध्येन महत्वान्नागरिकतासिद्धिः ॥ युवत्यादीनामुत्कर्षो देहगुणालंकारजीवितपरिकरेभ्यः ॥ तत्र ॥ etc.

Ends.—

" एवं शोभा समुत्पादकसमुद्दीपकानुप्राणकव्यञ्जकाः क्रमादगुणालंकारजीवितपरिकराः ॥ एवं परस्परोपकारकत्वादितरेतरानुग्राहकत्वं सिद्धम् ॥ इति श्रीराजानकरुय्यकविरचितायां सहृदयलीलायां परिकरोल्लेखश्चतुर्थः ॥ समाप्तेयं सहृदयली(ला) क्र(कृ?)तिश्रीमद्विपश्चिद्वा राजानकतिलकात्मजश्रीमदालंकारिकसमाजाग्रगण्यश्रीराजानकरुय्यकस्य श्रीराजानकरुचकापरनाम्नोलंकारसर्वस्वकृतः ॥ ॥ ॥

References.— 1 Aufrecht's Catalogues Catalogorum part I, page 705.[a] Aufrcet mentions only two Mss. viz. 265-66 of 1875-76 of this library.

2 S. K. De : History of Sanskrit Poetics Vol. I, page 196.

3 Printed Editions: The work has been edited in the Kāvyamālā Series 5, pp. 150-60 as well as by Pischel.

सहृदयलीला Sahṛdayalīlā

No. 302 265. 1875-76.

Size.— $6\frac{3}{8}$ in. by $9\frac{5}{8}$ in.

Extent.— 39 leaves ; 23 lines to a page ; 25 letters to a line.

Description.— Country paper, very old, musty and worn out; Śāradā characters; hand-writing not uniform but legible; the Ms may have been written by different hands. Also see No. 21.

Age.— The Ms appears to be a new copy.

Author.— Ruyyaka.

Begins. — fol. 37

ॐ स्वस्ति ॥ ॥ श्रीमतामुत्कर्ष परिज्ञानाद्वैदग्ध्येन सहृदयत्वान्नागरिकतासिद्धिः ॥ युवत्यादीनामुत्कर्षो देहेगुणालंकारजीवितपारेकरेभ्यः ॥ तत्र शोभाविधायिनो धर्मा गुणाः रूपं वर्णः प्रभारागः आभिजात्यं विलासिता लावण्यं लक्षणं च्छाया सौभाग्यं चेत्यमी गुणाः ॥

Ends.— fol. 39[a]

एवं परस्परोपकारत्वादितरेतरानुग्राहकत्वं सिद्धम् ॥ सहृदयललिायां परिकरोलेखः चतुर्थः ॥ समाप्तेयं सहृदयचमत्कारिणी सहृदयललिाकृतिः ॥ श्रीविपश्चिद्वररराजानकतिलकात्मजश्रमिदलंकारिकसमाजाग्रगण्यश्रीराजानकरुय्यकस्य राजानकरुचकापरनामो ... ... स्वकृतः ॥ शिवम् ॥

References.— Same as in No. 301.

साहित्यदर्पण Sāhityadarpaṇa

No. 303 712. 1891–95.

Size.—$8\frac{1}{2}$ in. by $4\frac{1}{8}$ in; the size of folios 188 to 194 is $7\frac{7}{8}$ in. by $3\frac{3}{4}$ in.

Extent.— 122 leaves; 9 to 12 lines to a page; 23 to 26 letters to a line.

Description.— Country paper, old, brittle and musty in appearance; in some cases corners slightly broken; borders ruled with double lines; Devanāgarī characters; hand-writing small, irregular and not very legible; certain lines and letters marked with red pigment; folio 1 pasted on another paper; certain folios carelessly written; folios missing are

17-25, 86-147 and 185 ; the Ms when in tact consisted of folios 1-194 ; the Ms is incomplete ; colophon of 9th *pariccheda* appears on folio 188.

Age.— The Ms appears to be very old.

Author.— Viśvanāth Kavirāja. (between 1300 to 1350 A. D.— See S. K. De Sanskrit Poetics Vol. I, p. 239.)

Begins.—

श्रीराधाकृष्णौ जयतः ॥

ग्रंथारंभे निर्विघ्नेन प्रारप्सितसमाप्तिकामो वाङ्म-

याधिकृततया वाग्देवतायाः सांमुख्यमाधत्ते ॥

शरदिंदुसुंदररुचिश्वेतसि सामे गिरां देवी ॥

अपहृत्य तमः संततमर्थानखिलान् प्रकाशयतु ॥ १ ॥

Ends. — folio 194

यथा वा ॥

येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृते ।

यश्चोद्वृत्तभुजंगहारवलयो गंगां च यो धारयत ॥

यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः

पापात्सस्वयमंधकक्षयकरस्त्वां सर्वदो माधवः ॥

अत्र येन ध्वस्ते इत्यादौ सभंगश्लेषः ॥ अंधके इत्यादौवभंगः ॥ अनयोश्चै··· ···

References.— For complete Bibliograply of printed Editions of Sāhityadarapaṇa as also its commentaries see S. K. De's *Sanskrit Poetics*, Vol. I, pp. 239-40. Mr. De also notes the Mss material in respect of the text and commentaries. The editions according to the year and place of publication are :—

(1)	Calcutta	1828	
(2)	Do	1851	
(3)	Benares	1882	
(4)	Calicut	1886	
(5)	Bombay	1910	
(6)	Do	1915	
(7)	Calcutta	1875	(Translation)

the work is represented by many Mss in the different libraries of Madras, Trivandrum, Bodlein etc.

Keith : H. S. L. pp. 394, 395
Ed. and trans. BI. 1851-75

Kane, Bombay 1923

Winternitz, G I L, p. 25

Editions :— (1) *Sāhityadarapaṇa* (Paricchedas I, II, and X) text with Introdnction and English Notes by P. V. Kane, Bombay, 1910.

(2) Text with comm. of Rāmacaraṇa Tarkavāgīśa Bhattacharya. Annotated by Pandit Duagaprasad Dviveda, and edited by K. P. Parab and the Annotator—N. S. Press, *Bombay—1902.*

(3) Bibliotheca Indica Edition, *1851 Calcutta*— Ed. by Dr. E. Roer and trans. into Engligh by Dr. J. R. Ballantyne.

(4) Text with Bhāṣāṭīkā by Pandit Shaligram—complete *Lucknow.*

(5) Text with comm. called रुचिरा of Pandit Shivadatta, *Bombay.*

(6) Text with notes on paricchedas I, II, X and History of Alaṁkāra literature by P. V. Kane—N. S. Press, *Bombay, 1923.*

(7) Text translated by Paramadas Mitra (Bi).

(8) Text with comm. edited by Haridasa Siddhānta vāgīśa. (Sd).

(9) Text edited by Haripada Chattopadhyaya (Sd).

(10) Text edited by Jīvanand Vidyasagar *1894*, 8 vo. pp. 13, 248 (Ch 5).

साहित्यदर्पण Sāhityadarpaṇa

No. 304 598. 1887-91.

Size.— 12 in. by $4\frac{3}{4}$ in.

Extent.— 32 leaves plus one blank leaf extra ; 6 to 8 lines to a page ; 24 to 36 letters to a line.

Description.— Country paper, old and worn out; Devanāgarī characters; for the first 3-4 folios the hand--writing is small and clear uniformly but onwards the copyist has grown careless writing thick big irregular letters; borders ruled with double lines; yellow pigment used for corrections; the 1st *pariccheda* ends on folio 8; the 2nd pariccheda ends on folio 23; the Ms is incomplete; edges of some folios are curled up and worn out.

Age.— The Ms appears to be very old.

Author.— Viśvanātha Kavirāja.

Begins. —

ॐ नमः श्रीपरदेवतायै ॥ ग्रंथारंभे निर्विघ्नेन प्रारिप्सितसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः सांमुख्यमाधत्ते ॥

शरदिंदुसुदररुचिः etc. — (as in printed editions)

Ends.— folios 31-32

" त्यागी कृती कुलीनस्सुश्रीको रूपयौवनोत्साही ॥
दक्षोऽनुकूललोकस्तेजोवैदग्ध्यशीलवान्नेता ॥

दक्षः क्षिप्रकारी ॥ शीलं सद्वृत्तं ॥ एवमादिगुणसंपन्नो नेता नायको भवति । तद्भेदानाह ॥ धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ॥ धीरप्रशांतइत्यमुक्त प्रथमश्चतुर्भेदः [1] ॥ स्पष्टम् । तत्र धीरोदात्तः । अ—

References.— See remarks on No. 303.

साहित्यदर्पण Sāhityadarpaṇa

No. 305 380 / 1895-98.

Size.— 10½ in. by 3¾ in.

Extent.— 146 leaves; one blank leaf extra; 11 lines to a page; 39 letters to a line.

---

1 This is verse 31 on p. 92 of N. S. Press Ed. of 1902.

Description.— Country paper, musty and worn out; some folios slightly moth-eaten; Devanāgarī characters; hand-writing small and not very clear; borders ruled with double lines; some of the folios inside are whitish in appearance while others present a darkish appearance; complete in 10 pari-cchedas.

Age.— The Ms appears to be very old.

Author.— Viśvanātha Kavirāja.

Ends..—

॥ श्रीसिद्धिविनायकाय नमः ॥ श्रीढुंढिराजाय नमः ॥

॥ श्रीसिद्धेश्वर्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

॥ अविघ्नमस्तु ॥ ॐ नमः श्रीकुलदेवतायै ॥

ग्रंथारंभे निर्विघ्नेन प्रारिप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः सांमुख्यामाधत्ते ॥

(the rest as in printed editions)

Ends—

श्रीचन्द्रशेखरमहाकविचंद्रसुनुः ।
श्रीविश्वनाथकविराजकृतप्रबंधं ।
साहित्यदर्पणमिमं कवयो विलोक्य ।
साहित्यतत्वमखिलं स्वयमेव वित्त ॥
यावत्प्रसन्नेंदुनिभानना श्री ।
नारायणस्यांकमलंकरोति ॥
तावन्मनः संमदयन्कवीना- ।
मेषप्रबंधः प्रथितोस्तु लोके ॥ क्ष ॥ छ ॥ छ ॥

इत्यालंकारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यशेषभाषाविलासिना भुजंगसाहित्यार्णवकर्णधारमाहापात्रश्रीविश्वनाथचिंतकविश्वनाथकविराजकृते साहित्यदर्पणे दशमपरिच्छेदः ॥ समाप्तश्चायं ग्रंथः साहित्यदर्पणमिति ॥ छ ॥

साहित्यदर्पणस्येदं पुस्तकं लिखितं शुभं ।
प्रीयेतां तेन मे देवौ माधवो माधवौ सदा ॥
॥ श्रीमन्महागणपतये सर्वसिद्धिप्रदाते सकलबुधविनेत्रे नमः ॥

References.— See remarks on No. 303.

साहित्यदर्पणविवृति Sāhityādarpaṇavivṛti

No. 306 599. 1887-91.

Size.— $10\frac{1}{4}$ in. by $4\frac{5}{8}$ in.

Extent.— 104 leaves; 9 lines to a page; 40 letters to a line.

Description.-- Country paper in good condition, though old in appearance; Devanāgarī characters; small, clear and uniform hand-writing; borders ruled with double lines; yellow pigment used for corrections; red pigment used for marking out certain letters and words; the Ms is incomplete, folio 1 to 150 (both inclusive) being lost; folios extant are 151 to 254 (both inclusive); the 8th pariccheda ends on folio 182 and the 9th pariccheda ends on folio 184.

Age.— The Ms appears old.

Author.— Rāmacaraṇa.

(The commentary gives the date of its own composition viz. Śake 1622 (= A. D. 1700) in the chronogram आक्षिपक्षरसचन्द्रसम्मिते etc. in the colophon).
2 2 6 1

Begins--folio 151

—पांस च पतिरापां योजनशतामिति अत्र पृथिव्युद्देशेन विहिसस्यापां पत्युर्योजनशतत्वविधातुद्देश्यतया प्रतिनिर्देशः। चंडीदासास्तु उद्देश्योऽनूद्य स एव प्रतिनिर्देश्यः प्रतीतिमांथर्य्यपरिहारार्थं पुनराभिधेयो यत्र स तथोक्त इत्याहुः।

Ends— इति साहित्यदर्पणाविवृतौ दशमः प्रकाशः ॥ ० ॥ १० ॥ ० ॥

अक्षिपक्षरसचन्द्रसम्मिते।
हायने शकर(व)सुंद(ध)रापतेः॥
श्रीलरामचरणाग्रजन्मना।
दर्पणस्य विवृत्तिः प्रकाशिता॥

दोषं कंचन वीक्ष्य सूक्ष्ममतयो द्विजाः शपंत्यत्र चेत्
तन्मां न व्यथयेद्गुरोरपि गिरो निर्दूषणा दुर्वचा

छात्राणां मतिमादधाति यदसौ गूढार्थसंदीपना-
दानंदं वितनोति यद्गुणविदां नेनास्म्यमोघश्रमः ॥
मन्मानसांबुजद्वंद्वं सेव्यमानं मुनीश्वरैः ।
वांछाकल्पतरुं वंदे रामचंद्रपदद्वयं ॥
वृंदावने प्रसिद्धो यो वज्रभूषणनामतः ।
तस्यायं लिखितो ग्रंथो नंदरामेण तन्मुदा ।
संख्या श्लोकाः ६०००

References.--- History of Sanskrit Poetics by S. K. De, Vol. I, p. 240.

"*Sahityadarpanavivrti* by Rāmacarana Tarkrvāgiśa, a native of Western Bengal, who dates his commentary in 1701 A. D.

— Aufrecht i, 716[a]; ii, 171[a]; iii, 148[a].

-- Madras Cata. 12969; Scc, vii, 50-52.

Frequently printed with the text in Bengal editions."

— N. S. Press Ed. of 1902 by Durgaprasad and K. P. Parab contains Rāmacarana's commentary in full.

साहित्यदर्पणविवृति Sāhityadarpaṇavivṛti

No. 307 211.
A 1882-83.

Size.— 14 in. by $5\frac{3}{8}$ in.

Extent.— 182 leaves; 9 lines to a page; 65 letters to a line.

Description.— Country paper, thick, whitish and in good condition; first and the last few leaves slightly worn out at the edges; Devanāgarī characters; clear, legible and uniform hand-

writing ; margin of about 1½ in. left on all sides through out ; folio 1 contains a table of contents as under:—.

	परिच्छेदसंख्या	पत्र	पृष्ट	पंक्ति
1	प्रथम परिच्छेद समाप्ति	११	१	६
2	द्वितीय ,,	२८	१	१
3	तृतीय ,,	६०	१	१
4	चतुर्थ ,,	७६	१	८
5	पंचम ,,	९३	२	१
6	षष्ठ ,,	१००	२	१
7	सप्तम ,,	१२६	२	९
8	अष्टम ,,	१३२	१	९
9	नवम ,,	१३४	१	३
10	दशम ,,	१८२	१	०

The last eight lines on the last folio 182 are in different ink and possibly a later insertion by a different hand.

Age.— Though well preserved the Ms appears to be old.

Author.— Rāmacaraṇa Bhaṭṭacārya (see remarks on No. 306).

Subject.— Alaṁkāra (commentary on the Sāhityadarpaṇa of Viśvanātha Kavirāja).

Begins.—

॥ गणेशाय नमः ॥

वागीश्वरी सरसगीतगुणप्रवाहं ।
सारस्वतसिततसेवितपादपद्मं ॥
हेमाद्रिमारकतशेखरकांतमीशं ।
वंदे खगेंद्रभुजमौलिगजं मुकुंदं ॥
श्रीविश्वनाथकविराजकृतिप्रणीतं ।
साहित्यदर्पणमतिस्थगितप्रमेयं ॥
श्रीमद्विधाय चरणं शरणं गुरूणां ।
यत्नेन रामचरणो विवृणोति विप्रः

Ends.—

अक्षिपक्षरसचंद्रसंमिते
हायने शकवसुंधरापतेः ।
श्रीलरामचरणाग्रजन्मना
दर्पणस्य विवृत्तिः प्रकाशिता ।
दोषं कंचन वीक्ष्य सूक्ष्ममतयो द्वित्राः शपंत्यत्र चेत् ।
तन्मां न व्यथयेद्गुरोरपि गिरो निर्दूषणा दुर्वचाः ।
छात्राणां मतिमादधाति यदसौ गूढार्थसंदीपना ।
दानंदं वितनोति यद् गुणवतां तेनास्यमोघश्रमः ॥
मन्मानसांबुजद्वंद्वं सं(से ?)व्यमानं मुनीश्वरैः ।
वांछाकल्पतरुं वंदे रामचंद्रपदद्वयम् ॥ ३ ॥

इति श्रीरामचरणभट्टाचार्यविरचितायां साहित्यदर्पणविवृत्तौ दशमपरिच्छेदः समाप्तः समाप्ता चेयं साहित्यदर्पणविवृत्तिः ॥ समाप्तेयं साहित्यदर्पणटीका

References.— See remarks on No. 306.

साहित्यरत्नाकर

Sāhityaratnākara

No. 308

. 815.
1886-92.

Size.— 13½ in. by 5 in.

Extent.— 110 leaves ; 9 lines to a page ; 50 letters to a line.

Descriptions.— Country paper, thin, but tough and somewhat whitish in appearance ; Devanāgarī characters ; hand-writing bold, uniform and legible ; the Ms is complete.

Age.— Samvat 1890.

Author.— Dharmasudhī.

Begins.—

श्रीरामाय नमः । श्रीसरस्वत्यै नमः ।
आलिंग्य गाढमुदरम्पितुरर्धजाने-
रूत्संगवर्त्यवतु बालगजाननो वः

यत्कुंभयोर्गिरिसुताकुचपार्श्वभाजोः
स्तन्यं पिपासति गुहास्त्रिभिराननाद्यैः ॥ १ ॥
श्रेयो मे विदधातु शारदशशिश्रीभासुरा भासुरा
हारासारनिरासकारिमधुरव्याहारिणी हारिणी
मुक्ता भूषणयोपणास्मितलवश्रीसाधुना साधुना
वण्ये न निजेन निर्जितवती रंभा रती भारती ॥ २ ॥
नमस्तमः कर्दमदुर्दमाम्बुधि
प्रणष्टचेष्टाखिलजंतुसंततिम्
प्रसार्यमाणैः पदुदीर्घरश्मिभि
र्जगत्त्रयोमुधरतेविवस्वते
निःयं रसार्द्रहृदयेंधनसंप्रयुक्त-
दाक्षायणी विरहदारुणपावकस्य
उधूतधूमकलिकामुपकण्ठमूलं
क्ष्वेलच्छलेन वहते महते नमोस्तु ॥ ३ ।
लक्ष्मीं वक्षसि तारहारवलये तस्याः प्रियं सोदरं
बिभ्रच्छुभ्रमणिं परं च नयने नाभौ च भद्रासनं
ऊरुभ्रूगलनाभिरोमलतिकामित्राणि पंचायुधा
व्याश्लिष्यन् करपंकजैरवतु नः कश्चिन्महाकामुकः ॥ ४ ॥
अनंतमत्यंतविशुद्धविग्रम्महाश्चिदानंदमयं निरामयं
अशेषवेदांतविचिंत्यवैभवं प्रशस्तमस्ति प्रविभास्वरं स्वतः ॥ ५ ॥
तदव्ययं ज्योतिरनाद्यविद्ययावृतं रजः सत्वतमोगुणाढ्यया ।
प्रजापतिश्रीपतिपार्वतीपतिप्रपंचरूपाणि मुहुः प्रपद्यते ॥ ६ ॥
तदेकदात्मन्यखिलं चराचरं निधाय नारायणनामकं महः
फणींद्रपर्यंकतले पयोनिधौ चिराय रेमे निजयोगनिद्रया ॥ ७ ॥
ततोऽस्य नाभीसरसःसरोरुहं समुद्ययौ यस्य समस्तमंबरं ।
वितन्वदिंदीवरश्यावविभ्रमं दलांतरालेषु चिरं व्यलीयत ॥ ८ ॥
ततस्तवस्तामरसात्समुद्यतचतुर्मुखस्तद्रजसेव राजसः
जगत्सिसृक्षुर्जगदीशशासनात्समाधिसंपन्नमनामनागभूत् ॥ ९ ॥
अस्मात्समाधिसाचिवान्मनसस्तदीयात्
पुत्रामरीचिपुलहप्रमुखाः प्रभूताः ॥
यत्पुत्रपौत्रतदपत्यपरंपराभि-
रापूरितो भवदजाणुकराहगर्भः ॥ १० ॥

तेष्वंगिरो मुनिवरादुदय प्रपेदे
भास्वानिवोदयगिरेर्हरितो मुनींद्रः
दोषानुषंगरहितश्च न भोगमार्ग-
भ्रांतोनिराकृततमाः शुचियोगदीप्तः ॥ ११ ॥
गोत्रे च तस्यसमभूदभिजातवंशो
वाराणसीत्युपपदेन भुवि प्रसिद्धः
तत्राभवन्बुधवरास्त्रिपुरारिसोम-
यज्वादयः शुभवपुः श्रुतिशीलवृत्ताः ॥ १२ ॥
देवान्हविर्भिरतिथीनशनैश्च शिष्यान्
वियोपदेशविधया परितोषयद्भिः
वाराणसीविहितानित्यनिवासदीक्षै-
र्यैः पंडितैर्भरतषण्डममण्डपुण्यैः ॥ १३ ॥
सर्वज्ञतः शमितकामरुषोगिरीशा-
च्छ्रीपार्वती प्रियतमा त्रिपुरारिनाम्नः
तस्मात्बुधाद्बहुमुखोद्गतवाग्विभूति-
र्धर्माद्धयस्तमदभून्महितः कुमार ॥ १४ ॥
नागांबिकां शुभगुणान्प्रतिगृह्यकन्या
मेकां गृहाश्रमनिवासकृते चिरं यः
अन्यप्रतिग्रहमयो निगमागमानां
मत्संप्रदायमकरोदवनावषंडम् ॥ १५ ॥
शंभोर्ददौ शतरुद्रकृताभिषेक-
तोयैर्ललाटगलतापहरैः कपर्दे
गंगात्मना परिणतैर्दधिरेव सिक्ता
नूनं जटावलिलताशशिपुष्पशोभां ॥ १६ ॥
यः सप्तवारविहितैर्वरदात्प्रहृष्टात्
प्रासादमंत्रसुपरश्वरणैर्महेशात
आसप्तमाद्वरमगान्निजवंशजानां
विच्छेदशून्यविमलाखिलशास्त्रबोधम् ॥ १७ ॥
विधिवदनुष्टितकर्मा धर्माख्यसुधीस्तुसंस्फुरधर्म्मा ।
जनयाम्बभूवनयान्नारायणपर्वतेशरामाख्यान् ॥ १८ ॥
पदक्रमपदाक्षरक्रमजटाक्रमारोहना
वरोहविषमक्रमाक्रममुखावधानाधृति

परिक्रमणचक्रवर्त्यभिधया दृदिग्मूढया
चचार बहुशः क्षितौ द्विजरथेन नारायणः ॥ १९ ॥
जित्वा रामावधानैमुखमुरुमरुद्वेगवद्वेदचर्चा
गोष्ठ्या नारायणार्यः सदशिवुधशतैः श्लाघ्यमानावदानाः ।
संदुष्टाद्धर्म्ममूपादलभत शिबिकां चामरच्छत्रपूर्वे
गर्वाखर्वावधानीश्वरसरभधटागण्डभेरुंडचिन्हम् ॥ २० ॥
तस्यानुजः पर्वतनाथसूरि-
रासीदशेषागमपारदृश्वा ।
ऐकात्म्यलीलायितमाहिमानां
षड्दर्शनी जन्मकृतां मुनीनाम् ॥ २१ ॥
एकं कोपि सुदर्शनं भ्रमकरं पाणौ ललाटे दधौ
कश्चित्कामविघातकं पदतले कश्चिच्छिवक्षोभकम्
निश्शेषभ्रममंजिकां शिवकरीं कामप्रदां पर्वत
धीशौर्य्यः समदर्शयद्दशनया षड्दर्शनीमद्भुतम् ॥ २२ ॥
वाग्मित्वद्युतिशुद्धिविष्णुभजनाभीष्टार्थविश्राणनै-
स्तस्मिन्विद्मयमावत्य हि पतौ नित्यैकता वारिता
द्वित्वं युष्यवतोः कृशानुपुगतं त्वित्व च दुष्टं चिरा-
दुत्सन्नं शनकादिषु प्रशमितं पंचत्वमिंद्रद्रुषु ॥ २३ ॥
येन स्वरभभाणि पाणिनिमतं प्राणादिकाणादवा-
ग्गुंभे स्पष्टमघट्टिभट्टगुरुवागुट्टीकिते कुट्टिये
निश्शंकं निरटंकिं शंकरमतं चाक्षोदिवाक्षांघ्रिवा-
ग्धन्यधन्युदलास्यखंडिनिखिला पाखंडखंडाटवी ॥ २४ ॥
यो वादेन जनार्दनाह्वयबुधं मध्ये विपश्चित्सभं
जित्वा विर्दतु वादिकेसरिपदं मौढं तदीयं स्वयं
मायावादिभयंकराख्यविरुदा तत्पूर्ज्जितादर्जितां
किंचोदं चयति स्म कीर्तिमतुलां प्रख्याययन्वैष्णवम् ॥ २५ ॥
आटोपोद्भटनात्यधूर्जटिजटाकोटीरकोटीतट-
द्गंगातुंगतरंगरिंथणभरसस्यर्द्धिवाग्वैभव
सोयं स्वप्रतिमाट्पन्निकषणमोघोतषड्दर्शनी
रलस्रङ्(?)भयंकरोपदनुजो रामाह्वयः पंडितः ॥ २६ ॥
तस्मात्पर्वतनाथसूरिजलधेः श्रीपल्लमाग्वावियं-
द्गंगासंगजुषोलसद्गुणमणेर्लब्धोदयश्चंद्रवत्

सोयं धर्मसुधी गवां विलसितैः कर्तुं रसालं क्रिया
संस्फूर्त्तिं समुदंचयेयमधुना साहित्यरत्नाकरम् ॥ २७ ॥

Ends.—

"अत्र चिंतास्मृतिदैन्यशंकाहर्षामर्षौत्सुक्यविषादानां शबलता । इति-श्रीमत्त्रिभुवनपवित्रहरितगोत्रावतंसवाराणसीवंशपद्माकरभानुना पदवाक्यप्रमाणपारावारीणश्रीमहोपाध्यायपर्वतनाथपंडितमंडलेश्वरसूर्यसूनुना श्रीपद्ममागर्भरत्नाकरपारिजातेन निर्मलाचारपरितेन चतुर्दशविद्यास्थानसिद्धांतरहस्यविज्ञानवता श्रीधर्मसंख्यावता विरचिते श्रीमद्रघुकुलतिलकगुणगणमणिधाम्नि साहित्यरत्नाकरनाम्न्यलंकारशास्त्रे रसनिरूपणं नाम दशमस्तरंगः ॥ १० ॥

आस्थामिंदिरमंदिरा प्रणयिनो देवस्य रामात्मनः
रम्बे गतुंगतरंगरिंगणभरैरङ्गीकृताडंबरः
ताप्लः(?) नीर्मलधर्मसूरिकविताकल्लोलिसोच्चेलुनैः
पूर्णः कर्णमनोहरो विहरते साहित्यरत्नाकरः ;
प्राचीनानुभवप्रबद्ध विहितग्रंथानुसंधापिता
सोयं साहसिकेन संप्रतिमपानलः प्रबंधः कृतः
कस्तुष्येदमुनाधुनास्य सुलभो बोद्धावनिर्मत्सरा
सर्वज्ञो गतमत्सरोस्ति हि रमा रामस्स संतुष्यतु
भो मातः कविते हितं मम वचः किञ्चित्समाकर्णय
श्रीमद्रामगुणस्तवामृतवतो मर्त्यस्तुतीं माकृथाः
कस्तुरीघनसारचंदनरसन्यासोत्सवास्वादवि-
त्कोवीवास्तवसास्त्रश्वपिशितालेपाभिलासो भवेत्
सा जातो हरितान्यपेमहातपः श्रीपर्वतेशः सुधी-
षणां दर्शनकारिणां सुमनसामैकात्म्यलीलाकृतिः
धर्माख्येन मनीषिणा विरचितस्ततत्सूनुना तादृशा
सो(ऽ)यं पादादिलातलं विजयता साहित्यरत्नाकरः

संपूर्णश्चायं ग्रंथः । ॐहरिः श्रीमते रामानुजाय नमः । श्रीमते वेदान्तमहागुरवे नमः । अथ संवत् १८९० मितिकुआरसुदीपरविवार बुधवरः ॥ ६ ॥

References.— 1 Mss.: Aufrecht i, 716[a]; ii, 171[a]; iii, 148[a].
2 S. K. De: Sanskrit Poetics, Vol. p. 298.

B—SAṀGĪTA

औमापतम्

Aumāpatam

No. 309

78.
1919-24.

Size.— $8\frac{7}{8}$ in. by $5\frac{1}{2}$ in.

Extent.— 128 leaves + 2 blank leaves = 130 leaves ; 9 to 10 lines to a page ; 21 letters to a line.

Description.— Smooth foolscap paper; Devanāgarī characters; borders ruled with double red lines ; paper ruled in pencil before writing; clear and legible hand-writing; copy made on one side of the paper only.

The work contains about 37 chapters. The titles of these chapters are as under:—

Folio	Chapter	Title
5	I	नादेहोत्पत्ति
7	II	ग्रामप्रस्तारलक्षण
11	III	जीवजातिप्रस्तार
12	IV	जातीनां प्रस्तारः
14	V	स्वरनामप्रस्तार
16	VI	स्वराधिकार
18	VII	श्रुतिप्रस्तार
19	VIII	मूर्च्छनाक्रम
20	IX	मूर्च्छनागेयप्रकरण
21	X	मूर्च्छनामंडललक्षण
31	XI	शुद्धरागलक्षण
44	XII	रागप्रस्तार
45	XIII	रूपलक्षण
47	XIV	मटिलक्षण
48	XV	कूर्मरूपादिध्रुवा-लक्षण
49	XVI	देवलोकध्रुवालक्षण
59	XVII	ध्रुवालक्षण
63	XVIII	त्रिपदालक्षण
66	XIX	अडुतालीलक्षण
67	XX	सुडादिगीतलक्षण
69	XXI	वेणुलक्षण
73	XXII	वीणालक्षण
78	XXIII	मातृकादिप्रबंध
82	XXIV	चर्चत्पुटादिशब्द-तालमेकोत्तरशत-प्रस्तारलक्षण
88	XXV	मेरुप्रस्तारलक्षण
90	XXVI	षोडशकोष्टमेरु-प्रस्तार
92	XXVII	मार्गप्रसादशुद्ध-प्रसादलक्षण

Folio	Chapter	Title
93	XXXVIII	चक्रादिपंचताल-प्रस्तार
95	XXIX	तालल्क्षण
97	XXX	मृदु(ता)ललक्षण
98	XXXI	आकजादिलक्षण
98	XXXII	अष्टविधनृत्यकरण
100	XXXIII	शिरोभेदलक्षण
102	XXXIV	अंगाभिनयलक्षण
110	XXXV	हस्तभेदलक्षण
113	XXXVI	कुंडालिशब्दप्रबंध
115	XXXVII	रसभावलक्षण
127	.....	उमापतीयं-समाप्तम्

Age.— A modern copy made in 1919 from a Madras Ms.

Author.— Apparently उमापति (The name of the author as such is not mentioned in the colophons).

Subject.— Music (गीतशास्त्र).

According to Mr. M. R. Kavi, औमापतम् is an epitome of the work of नन्दिन् in 40 chapters. It is a mere Catalogue of technical terms. King Raghunātha of Tanjore describes it as follows:—

" उमापतेराधुनिकस्य तन्त्रं विलोक्य नन्दीशमतानुसारि

(See JAHRS-I, pt. 2, p. 59).

Begins.—

॥ श्रीगुरुयो नमः ॥ श्रीगणपतये नमः ॥

प्रणिपत्य महेशानी शम्भुमासीनमन्तिके ॥
पप्रच्छ तत्वतो ब्रूहि नादांस्त्वद्रूपसंभवान् ॥ १ ॥

ईश्वर उवाच ॥

भूतोत्पत्तिं प्रवक्ष्यामि देहोत्पत्तिं च पार्वति ॥
विना तयोः परिज्ञानं सम्यक्ज्ञानं न बुध्यते
महाप्रलयकालेपि सर्वभूतापहारिणि ॥
आकाशनादयोर्नास्ति सूक्ष्मयोः क्षयसंगमः ॥ ३ ॥
कावेव भुवनस्यास्य कारणं सकलस्य च ॥
बाह्याभ्यंतरयोर्देवि नादउत्पत्तिकारणं ॥ ४ ॥
यत्र नादस्य संभूतिस्तत्र तालो विजृंभते ॥
नादात्मकमिदं देवि सर्वतालमयं जगत् ॥ ५ ॥

Ends.—

" उमापतीयं समाप्तम् ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ

.....खड्गैरिरुधिरैरन्यातदीयांगन, बाष्पासारपरंपरा.....पगसत्पात्र दानांबुभिः ॥ एकामेव भगीरथोभुवि नदीं गंगाम.....लोकेस्मिन् भुवनैकवीर-भवता नयश्च तिस्रः कृताः ॥ आधारे लिंगनादैर्हृदयसरसिजे तालमुले ललाटे । द्वेपत्रे षोडशा.....द्विदशदशदले द्वादशार्थे चतुष्के ॥ वास.....मध्ये..... सहिते साठसर्गे क्षहान्ते ॥ मध्ये फं स सुसूक्ष्मं सकलदलयुतं वर्णरूपं नमामि ॥ ६ ॥ श्रीवेदव्यासाय नमः ॥ श्रीसरस्वते नमः ॥ श्रीगुरुभ्यो नमः ॥ हरिहरा-भ्यां नमः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

References.— Aufrecht I, p. 76—

" औमापत on music, apparently by उमापति.

— Oppert 2568.

(in Malayālam characters ; in the library of H. H. the Ceria Anujan Raja).

JAHRS—III, pt. 1—p. 26—.

Nandin or Taṇdu in the author of नन्दीश्वरसंहिता. He was the propounder of the *Śaiva* or *Āgamic* school of music. His Saṁhitā was available till 1620 when Raghunātha of Tanjore borrowed from it. The work is now extinct except a chapter on histrionics. उमापति's work referred to by Raghunātha is now extant in 40 chapters where every topic of *gāndharva* is dealt with. *The author probably of the 14th century A. D.* gives out only a Catalogue of technical terms in great detail. In this work श्रुतिs are 137, स्वरs are thousands, ग्रामs 18, शुद्धरागs 68, सालगs 69. He enumerates 101 तालs besides those found in शिवरात्र, one of the five pañcarātra cults.

गीतालंकार Gītālaṁkāra

No. 310 977.
1887-91.

Size.— $10\frac{1}{2}$ in. by $4\frac{3}{8}$ in.

Extent.— 19 leaves; 12 lines to a page; 50 letters to a line.

Description.— Country paper, musty and worn out; Devanāgarī characters; clear and uniform hand-writing; borders ruled with double black lines; folios that together make up one single double folio are: (3, 4); (6, 7); (10, 11); (12, 13); (14, 15); (16, 17); all folios are written on one side of the paper only; the Ms contains the following Colophons indicating the division of the subject matter of the work:—

Colophon	folio
इति गीतालंकारे प्रथमोऽध्यायः	2
,, कण्ठशुद्धि अध्यायो द्वितीयः	3
,, दूषणाध्यायस्तृतीयः	4
,, स्वरलक्षणाध्यायश्चतुर्थः	6
,, ग्रामलक्षणाध्यायः	7
,, मूर्च्छना लक्षणाध्यायः	8
,, तानकलक्षण ध्यायः	11
,, मात्रालक्षणमध्यायः	12
,, लयलक्षणमध्यायः	12
,, यतिलक्षणमध्यायः	12
,, रसलक्षणाध्यायः	13
,, वर्णलक्षणाध्यायः	16
,, भाषालक्षणमध्यायः	19

Age.— The Ms appears to be very old.

Author.— The work is ascribed to *Bharata*.

Subject.— Music.

Begins—

ॐ ॥ स्वस्ति श्रीगोगीभ्यों नमः

प्रणम्य भरतो भक्त्या सर्व्वदं शिवदं शिवं ।
गीतस्य लक्षणं प्राह वादिमत्तगजांकुशम् ॥

सर्वेषामेव लोकानां दुःखशोकविनाशनं ।
यस्मात्संदृश्यते गीतं सुखदं व्यसनेष्वपि ॥
भूईष्टमेव लोकानां सुखमिच्छति नित्यशः ।
तस्य मूलं भवेद्गीतं सुनधः संपदामिव ॥
धर्मार्थिकाममोक्षाणां साधनं गीतमुच्यते ।
यतस्ततप्रयत्नेन गेयं श्रोतव्यमेव च ॥
गुरुदेवद्विजातीनां यत्पुरो गीयते नरैः ।
तद्धर्मायभवेत्तेषां स्वर्गाय विजयाय च ॥

Ends—

॥ इति भाषालक्षणमध्यायः ॥ १४ ॥
इति भरतकृतं गीतालंकारं वादिमत्तगजांकुशं समाप्तमिति ।
नादग्रामपदस्वराविधिगणावर्गालयास्तानका ।
आलप्त्या गमकाश्च तालरचना ज्योतिः कलामूर्च्छनाः ।
शुद्धाद्या गुरुरागरंगभरणा देशी च सालंगया ।
नादस्यापि समस्तसूत्रघटना स्थानंतरं पातु वः ॥

References.— Aufrecht mentions other Ms of this work except the present one. Mr. M. R. Kavi remarks : "Dr. Aufrecht seems to have considered Bharatabhāṣya (of Nānyadeva) as a commentary on Bharata's Gītālaṁkāra" (JAHRS —vol. 1, No. 2, p. 55).

दक्षिणीरागमाला — Dākṣiṇīrāgāmālā

No. 311 — 384. 1895-98.

Size. — 10 in. by $4\frac{3}{8}$ in.

Extent.— 5 leaves ; 19 lines to a page ; 57 letters to a line.

Description.— Country paper some what musty in appearance ; Devanāgarī characters ; borders ruled with triple red lines ;

verse-numbers and colophons of different portions marked out with reddish pigment ; brittle paper ; corners slightly worn out.

Age.— *Samvat 1729.*

Author.— Not mentioned.

Subject.— Music ; rāgas, their forms etc.

Begins—

॥ अथ रागमाला लिख्यते ॥

नादग्रामस्वरापदाविधिगुणावर्गालयास्तानक
आलत्यागमकां च तालरचना ज्योतिः कलासूर्च्छना
सिद्धाया गुरुरागरंगभरणे देसीय सालोक्यकं
सालंकारसमस्तशूडघटना स्थानंतरं पातु वः ॥ १ ॥

लांबोदरमहाभीमं लंबोष्टं गजकर्णकं
भयन्नपार्वतीपुत्रं नमामि गणनायकं ॥ २ ॥

गंगाधारं गणाधारं गौरीनाथं महेश्वरं
गोवाहनगतं देवं प्रणमामि महेश्वरं ॥ ३ ॥

ईश्वरोवाच—

माहेश्वरं च वक्तव्यं आकर्णेपि महागणः
न मे पूजा च तृप्यंति एक गीतं च उच्यते ॥ ४ ॥

न मे पुष्पं च धूपं च नाहारं दीपमेव च
मम प्राणप्रियं गीतं सर्वपूजाफलं भवेत् ॥ ५ ॥

सुवाण्यालापितं गीतं स्वचित्तं यस्य भावना
श्रीफलं लभते तस्य सततं पुत्रपौत्रका ॥ ६ ॥

गीतं च स्वयमेवं च गीतं च प्राणवल्लभं
यत्र यत्र स्वगीतं च तत्राहं नास्ति संशयः ॥ ७ ॥

Ends.—

श्वेतवस्त्र वृषभारूढ हाथि फूलमाला
कषायवर्ण कंचुकी सजल नेत्र प्रातसमये
मदग्नीमूर्छा वृषभस्वर गाइ जै तान ४
व्यंजन अर्द्ध तंतु मिश्रित घनतकारू

इति देवालीवर्णना इति षष्टमो नट्टनारायणरागसंप्रदाय समाप्तः ६

इति दाषि(क्षि)णीरागमाला समाप्ता । शुभं भवतु ग्रंथसं ४०१
सं १७२९ कात्ती सु ४ दिने लि. प्रेममुनिना

References.— Aufrecht mentions this Ms only in his Catalogus Catalogorum part III, page 106.

भरतभाष्य
(सरस्वतीहृदयालंकार)

Bharatabhāṣya
(Sarasvatihṛdayālaṁkāra)

No. 312

111.
1869-70.

